प्रथमः पाठः

सुभाषितानि

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम् ॥ 2 ॥

दाने तपसि शौर्ये च विज्ञाने विनये नये ।
विस्मयो न हि कर्त्तव्यो बहुरत्ना वसुन्धरा ॥ 3 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥ 4 ॥

धनधान्यप्रयोगेषु विद्यायाः संग्रहेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 5 ॥

क्षमावशीकृतिर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ 6 ॥

शब्दार्थाः

पृथिव्याम्	–	धरती पर
सुभाषितम्	–	सुन्दर वचन
मूढैः	–	मूर्खों के द्वारा
पाषाणखण्डेषु	–	पत्थर के टुकड़ों में
रत्नसंज्ञा	–	रत्न का नाम
विधीयते	–	किया जाता है
धार्यते	–	धारण किया जाता है
तपते	–	जलता है
वाति	–	बहता है / बहती है
वायुश्च (वायुः + च)	–	पवन भी
प्रतिष्ठितम्	–	स्थित है
तपसि	–	तपस्या में
शौर्ये	–	बल में
नये	–	नीति में
विस्मयः	–	आश्चर्य
बहुरत्ना	–	अनेक रत्नों वाली
वसुन्धरा	–	पृथिवी
सद्भिरेव (सद्भिः + एव)	–	सज्जनों के साथ ही
सहासीत (सह + आसीत)	–	साथ बैठना चाहिए
कुर्वीत	–	करना चाहिए
सद्भिर्विवादम् (सद्भिः + विवादम्)	–	सज्जनों के साथ झगड़ा

नासद्भिः (न+ असद्भिः)	–	असज्जन लोगों के साथ नहीं
धनधान्यप्रयोगेषु	–	धनधान्य के प्रयोग में/व्यवहार में
संग्रहेषु	–	संग्रहों में, संचय (इकट्ठा) करने में
त्यक्तलज्जः	–	संकोच या भीरूता को छोड़नेवाला
क्षमावशीकृतिर्लोके (क्षमावशीकृतिः + लोके)	–	संसार में क्षमा (सबसे बड़ा) वशीकरण है
शान्तिखड्गः	–	शान्ति की तलवार

अभ्यासः



1. **सर्वान् श्लोकान् सस्वरं गायत।**

2. **यथायोग्यं श्लोकांशान् मेलयत–**

क	ख
धनधान्यप्रयोगेषु	नासद्भिः किञ्चिदाचरेत्।
विस्मयो न हि कर्त्तव्यः	त्यक्तलज्जः सुखी भवेत्।
सत्येन धार्यते पृथ्वी	बहुरत्ना वसुन्धरा।
सद्भिर्विवादं मैत्रीं च	विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च	सत्येन तपते रविः।

3. **एकपदेन उत्तरत–**

(क) पृथिव्यां कति रत्नानि?

(ख) मूढैः कुत्र रत्नसंज्ञा विधीयते?

(ग) पृथिवी केन धार्यते?

(घ) कैः सङ्गतिं कुर्वीत?

(ङ) लोके वशीकृतिः का?

4. **रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-**

(क) सत्येन वाति वायुः।

(ख) सद्भिः एव सहासीत।

(ग) वसुन्धरा बहुरत्ना भवति।

(घ) विद्यायाः संग्रहेषु त्यक्तलज्जः सुखी भवेत्।

(ङ) सद्भिः मैत्रीं कुर्वीत।

5. **प्रश्नानामुत्तराणि लिखत-**

(क) कुत्र विस्मयः न कर्त्तव्यः?

(ख) पृथिव्यां त्रीणि रत्नानि कानि?

(ग) त्यक्तलज्जः कुत्र सुखी भवेत्?

6. **मञ्जूषातः पदानि चित्वा लिङ्गानुसारं लिखत-**

रत्नानि वसुन्धरा सत्येन सुखी अन्नम् वह्निः रविः पृथ्वी सङ्गतिम्

पुँल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
....	....	....
....	....	....
....	....	....

7. **अधोलिखितपदेषु धातवः के सन्ति?**

पदम्	धातुः
कर्त्तव्यः	....
पश्य	....
भवेत्	....
स्थितः	....